# shrIchaturviMshatyavatArastotram

# શ્રીચતુર્વિંશત્યવતારસ્તોત્રમ્

## Document Information

Text title : chaturviMshatyavatArastotram

File name : chaturviMshatyavatArastotram.itx

Category : vishhnu, dashAvatAra, stotra, vishnu, chaturviMshati

Location : doc_vishhnu

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal, KSR, PSA Easwaran

Description/comments : brihatastotraratnakar 464

Latest update : May 17, 2015, October 6, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2022

*sanskritdocuments.org*

shrIchaturviMshatyavatArastotram

# શ્રીચતુર્વિંશત્યવતારસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
પાતાલગં ક્ષિતિતલં સુરવૃન્દપાતા હત્વાઽઽદિદૈત્યમુદધેર્નિદધૌ જલોર્ધ્વમ્ ।
ઉદ્ધૃત્ય ચાતનુત યસ્તનુતો યજૂંષિ તં સૂકરં પ્રથમપ્રથમં નમામિ ॥ ૧॥ var તં શઙ્કરં
સ્વાયમ્ભુવં મનુમપાચ્ય ભુવં સમસ્તાં ભૂત્વા તદીયતનયાતનયોઽથ હત્વા ॥
યઃ સ્વાત્મજૈઃ સુરગણૈરસુરવ્રજં તં યજ્ઞં દ્વિતીયમભવાય ભજેઽદ્વિતીયમ્ ॥ ૨॥

પ્રાદુર્બભૂવ ભવદુર્બલચિત્તવૃત્તીન્ જ્ઞાનોપદેશરહિતાનુપદેષ્ટુકામઃ ।
યો દેવવન્દ્યચરણો નનુ દેવહૂત્યાં વન્દેઽવગાહકપિશં કપિલં તૃતીયમ્ ॥ ૩॥

યઃ સૂનુકામુકમસૂનુપરોધયન્તં સન્તોષયન્ સ્વજનકં સ્વજનાર્તિહાત્રિમ્ ।
જજ્ઞે વિધૂતભવભીરવધૂતવેષો દત્તો ભવપ્રભવદુઃખહરોઽસ્તુ તુર્યઃ ॥ ૪॥

સઙ્કલ્પમાત્રકરણાદ્ધતકલ્પનષ્ટં ગૂઢં સ્વતત્ત્વનિગમં સુગમં કરિષ્યન્ ।
ધાતુર્વિચારચતુરોઽજનિ યશ્ચતુર્ધા સેવસ્વ પઞ્ચમમપઞ્ચશરં કુમારમ્ ॥ ૫॥

સત્કારમર્હતિ સતામપકારકોઽપીત્યેવંવિધામૃષિગિરં વિશદાં વિધાસ્યન્ ।
યોઽશેષદોષસદને મદનેઽદયિષ્ટ નારાયણો વિજયદો જયતાત્ સ ષષ્ઠઃ ॥ ૬॥

યઃ કેશવેઽકૃતરતિં કિલ શૈશવેઽપિ દૃષ્ટ્વા સ્વદુઃખહરણં શરણં તદેવ ।
તસ્મૈ સુનીતિતનયાય નયાન્વિતાય નિત્યં ધ્રુવાય વરદં વરયેઽશ્વસંખ્યમ્ ॥ ૭॥

કિં વેનમુત્પથગતં પુપુવે ન ભૂમિં કિં દુગ્ધરૂપમથ સારમદુગ્ધ યો ન ।
તં વૈ હિતાય જગતાં વિહિતાવતારં વન્દેઽષ્ટમં પૃથુમહં પૃથુલપ્રતાપમ્ ॥ ૮॥

પૂર્વં નિજાચરણતો ગૃહિણામપૂર્વં ધર્મં જનાય નિદિદેશ જનાન્તરજ્ઞઃ ।
યોઽન્તે તથૈવ વિરજસ્તમસાં વિરજ્યન્નત્યર્ષભોઽસ્તુ નવમો નવસિદ્ધિદઃ સઃ ॥ ૯॥

નિદ્રાન્વિતસ્ય મુખતો હિ ચતુર્મુખસ્ય સ્રસ્તા જલે પ્રતિદદેઽપ્રિતમઃ શ્રુતીર્યઃ ।
હત્વા તુરઙ્ગવદનં ચતુરં રણે તં સૌખ્યેહયા કિલ ભજે દશમં હયાસ્યમ્ ॥ ૧૦॥

સત્યવ્રતાય નિજભક્તિરતાય નિત્યં ગુહ્યં પુરા વિવિદિષુઃ સ્વપુરાણતત્ત્વમ્ ।

યોઽકાલજે પ્રલયકાલજલે વ્યહાર્ષીદિકાદશો જગતિ મે ગતિરસ્તુ મત્સ્યઃ ॥ ૧૧॥

પૃષ્ઠેન મન્દરમમન્દભરં ગિરિં યઃ ક્ષીરોદધાવમરદૈત્યકૃતે દધાર ।
નિઃશ્વાસનર્તિતતરઙ્ગસુરઙ્ગલુબ્ધઃ સ દ્વાદશોઽસ્તુ કુદશોપશમાય કૂર્મઃ ॥ ૧૨॥

સર્વં જગદ્ધરિમયં જગતીતિ વાક્યં તથ્યં વિધાતુમથ ચિત્રતનૂં વિધાય ।
સ્તમ્ભાદજાયત સદા યતતાં દુરાપઃ સોઽસ્તુ ત્રિયુક્તદશમઃ શમદો નૃસિંહઃ ॥ ૧૩॥

વાત્સલ્યમાત્મપુરુષેષુ પુરુપ્રતાપઃ સન્દર્શયન્નવિરતં નિરતં સ્વભક્તૌ ।
ગ્રાહાદમોચયદમોઘબલો ગજેન્દ્રં ભૂત્યૈ હરિર્મનુમિતોઽસ્ત્વમિતોપમઃ સઃ ॥ ૧૪॥

સર્વસ્વમેવ બલયેઽર્પયતે સ્વમેષ પ્રત્યર્પયત્તદપરં ન તદર્હમગ્ર્યમ્ ।
લોકત્રયે કિમપિ વસ્તુ વિલોકમાનઃ શ્રીવામનો વસતુ પઞ્ચદશો મનોઽબ્જે ॥ ૧૫॥

પૃષ્ટાન્નિગૂઢવિષયાન્ સુવિષણ્ણચિત્તે જાતે વિધાતરિ વિધાતૃસુતૈઃ સુવિજ્ઞૈઃ ।
ઉદ્ભૂય સુષ્ઠુતરમુત્તરયાઞ્ચકાર સ્યાત્ ષોડશઃ પરમહંસગતિઃ સ હંસઃ ॥ ૧૬॥

આવિર્બભૂવ ભુવિ ભૂવલયં પ્રપાતું યઃ સજ્જનેષુ કિલ કલ્પપલાશિકલ્પઃ ।
દુષ્ટવ્રજસ્ય દહને દહનોઽદ્વિતીયસ્તં ત્વાં મનું પુરુષસપ્તદશં મનુષ્વ ॥ ૧૭॥

યોઽર્થાય વિષ્ણુરુદધેરુદભૂત્ સુરાણાં નાનાવિધામયવિનાશવિધાનવિજ્ઞઃ ।
પીયૂષયૂષપરિપૂર્ણઘટં ગૃહીત્વા ધન્વન્તરિઃ સુખકરોઽસ્તુ કરોનવિંશઃ ॥ ૧૮॥

રાજન્યકં પ્રવરરાજગુણૈર્વિહીનં ગર્વાત્સ્વધર્મપરધર્મવિચારશૂન્યમ્ ।
યોઽનેકવારમવધીદવધીરિતસ્તમેકોનવિંશમવબુધ્યતિ કો ન રામમ્ ॥ ૧૯॥

પિત્ર્યં નિયોગમતિદીર્ઘવિયોગદાયિ સમ્માનયન્ મનુસમા વ્યનયદ્વનેષુ ।
યઃ સ્વીયરક્ષણકૃતે વિહિતક્ષણસ્તં શ્રીરામમાશ્રયવરં  શ્રય ચિત્ત વિંશમ્ ॥ ૨૦॥

સમ્પીડિતાં મનુજપૈર્દનુજસ્વભાવૈરુજ્જીવયન્ વસુમતીં વસુદેવગેહે ।
આવિર્બભૂવ જનતાપરિતાપહૃત્ સ કૃષ્ણોઽસ્તુ મેઽપિ ગદહા ગદયૈકવિંશઃ ॥ ૨૧॥

કાલેન નષ્ટધિષણાન્ પ્રબલેન વીક્ષ્ય લોકાન્ પરાશરમુનેઃ શરણેઽવતીર્ણઃ ।
ભક્તપ્રિયઃ શ્રુતિગણં બહુધા વ્યભંક્ત વ્યાસોઽસ્તુ મે શિવકરઃ કરનેત્રસંખ્યઃ ॥ ૨૨॥

લોકે મખાદિમિષતસ્ત્વસુખાદિબીજાં વ્યાપ્તાં પ્રભૂતકરણેઽમિતભૂતહિંસામ્ ।
યો મૂલતઃ કિલ વિમૂલયિતું પ્રજજ્ઞે ચિત્તે ત્રિનેત્રકલનં કલયામિ બુદ્ધમ્ ॥ ૨૩॥

પ્રાપ્તેષુ સત્સુ તનુતાં પ્રચુરેષ્વસત્સુ ધર્મે તિરોહિતવતિ પ્રસૃતે ત્વધર્મે ।
જજ્ઞેઽથ વિષ્ણુયશસો નિલયે યશસ્વી કલ્કી પ્રસિદ્ધચરિતોઽવતુ સિદ્ધસંખ્યઃ ॥ ૨૪॥

॥ ઇતિ શ્રી ચતુર્વિંશત્યવતારસ્તોત્રં સમ્પૂર્ણમ્ ॥

This stotram praises the 24 important incarnations
of Vishnu as described in Srimad Bhagavatam
Canto-sarga 1 chapter-adhyAya 3 and
Canto 2 chapter 7
with some variations.

Encoded by Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by Dinesh Agarwal, K S Ramachandran, PSA Easwaran

*shrIchaturviMshatyavatArastotram*
pdf was typeset on January 14, 2022

Please send corrections to *sanskrit@cheerful.com*